वाच्यम् । तीक्ष्णस्य मृदुनः खरस्य स्निग्धस्य मृदुतीक्ष्णस्य वज्रलोहस्य च विज्ञेयं कुट्टिमङ्कोशगर्भमेककोशगर्भं कुट्टिमकोशगर्भम् । सुतीक्ष्णं करणप्रवरं भवति । मृदुतीक्ष्णं मध्यमगर्भं कुट्टिमञ्च कारयेत् मृदुतीक्ष्णकुट्टिमं कोशगर्भमेकगर्भालयं वेति तथा तीक्ष्णं मन्दं वेति विविधमायसं भवति । तीक्ष्णस्य कुलानि उपकुलानि पुनः स्मृष्टानि वीतकर्पुष्कलालावेतकं यावङ्काशिकमङ्कोलं मयूरं हमालं वीरकां वरं पुष्करार्कं पुष्कराङ्कक्रोड़िनं वर्वरं रौद्रं शालिकं किष्किन्धं विस्फुलिङ्गं वाह्लीकं सुराष्ट्रायसं वेति तीक्ष्णयोनयो भवेयुरेकविंशतिरथ मन्दायसो वक्ष्यन्ते । काम्बोजं काण्डवारं हम्बालं सूर्य्यारङ्काष्ठमलयं पुन्नागपर्वतं यावतन्द्रं तीक्ष्णं कलिपार्वतीयं सिंहालकं वानवासीसिन्धुकं मूषकं नीलाखण्डं मागधं देवान्तं मेनकं वाह्लीकं पारवं क्रथं शट्टाकं शाण्डिलं पालकं तुचुरतोलकं चिन्तपालं नीलामुखं कूणीराष्ट्रं महेन्द्राष्ट्रं विचर्तुकं वेति लोहाः त्रिंशदेका भवन्ति । कुलानां संग्रहाद्विविधा लोहा तन्निबोध सप्त भवन्ति । मार्द्दवस्य खरस्य त्वष्टौ स्नेहान्वितस्य पुनः षड्गवन्ति । मृदुतीक्ष्णस्य दशैवस्तुवज्रायसस्यैकमेवेति कुलान्येतानि संग्रहाद्दुक्तानि तत्र काम्बोजं काण्डवारं हंनुपालं नीलाखण्डं खरस्यैतानि भवन्ति । पावनं वटतीक्ष्णं कालिङ्गं पार्वतीयं सिंहालं लङ्कवालञ्च चेति स्नेहान्वितस्यैतानि कुलानि षड्भवन्ति । नीलामुखं कूणीराष्ट्रं महेन्द्राष्ट्रं विचर्त्तुकं सौपिरं काष्टमलयं पुन्नागपर्वतं सिन्धुकं मूषिकं दक्षिणामुखं चेति मृदुतीक्ष्णस्य दशैतानि कुलानि भवन्ति । यद्दन्तु लोहं वेद्यन्तरगुहासु जायते तच्च वज्रलोहमिति विद्यात् । परमेतानि वज्रायसविवर्जितानि त्रिंशदेकाधिकानि । मृदु तीक्ष्णं मृदुतीक्ष्णं स्निग्धं खरं चेति । वीतकादीन्येकविंशतिं क्ष्णानि वक्ष्यन्ते यत्र दृढत्वं बलवत्त्वं स्निग्धतां लाघवङ्गौरवं च विशेषात्तत्र तत्र विविधं भवति हुताशनकर्म्मणि तत्र छिन्नपाटलानिभं भवति । यत्र वर्चस्वा दृश्यन्ते त्रुटिते चूर्णिते वा हुताशनेऽपि त्रुट्यमानं सकृदेव प्रभज्यते मलेऽग्रे च सर्वदक्षिणतो वैवर्ण्यं भजेन्मत्स्यकण्टकच्छाया वा स्यात् लिक्षासीसनिभा वा श्वेतकृतनिस्रावतोरहान्यैव तत् मृदुलोहमिति विद्यात् । त्रयाणां चीनकादीनां लक्षणं वक्ष्यते आकृत्या संस्थानेन वर्णेन गन्धेन शब्देन क्रमशः स्यात् पृथक् वेतसवञ्जुलपत्राणामाकृतिः करवीरपत्राणां वा भवति । षड्स्रैर्युतं मिश्रकैरष्टाश्रैश्चतुरस्रैर्व्वा वृत्तं विपुलं वा नालसूत्राकृतिर्वेति । संस्थानतःपरीक्षणीयम् निर्गुण्डीकुसुमानामिव यत्र वर्णोऽञ्जनालतकयोर्वा मयूरकण्ठच्छविः शुकपिच्छनिभः । काककोकिलसदृशोमक्षिकाभो वेति । वर्णतः परीक्षणीयं चारुलोहम् । तथा अङ्कोलस्योत्पलस्य मूषिकायाः पत्रस्य मधुकस्य वा गन्ध इति गन्धतः परीक्षणीयम् । तथा कांस्यघण्टाया वलाकानां शब्दइव शब्दो विस्फुलिङ्गायायस्येति शब्दतः परीक्षणीयावि ज्ञातव्याः" । उपकुलादि विस्तरभयान्नोक्तम् "युग्माङ्गुलाः प्रशस्ताः अयुग्माङ्गुला विगर्हिताः खड्गास्ते केऽपि ब्राह्मणस्य परिग्रहाधमनासं दिशन्ति क्षत्रियस्यार्थविनाशं कुलक्षयं कुर्व्वति वैश्यस्य तु सद्योबधमावहन्ति शूद्रस्य न कदाचिदपि वृत्तिकराः सुस्तया व्रणाः छायास्निग्धवर्णाः पूजिताः छिन्ना रूक्षवर्णाश्चरूपानुज्वलाश्च भर्त्तुरपजयाय स्मृतिगर्हिताः" । त्रिकोणाःपञ्चकोणाश्चतुरस्राव्रणाः प्रशस्ताः । अनुलोमाश्च प्रतिलोमाश्च प्रशस्तदीर्घतायै खड्गस्य भवन्ति । ते प्रतिलोमावेदितव्याः खड्गस्यानुगता अनुलोमा व्रणापदेशो वक्ष्यते । पूजितोनिन्दितश्च यदि खड्गस्याद्येऽङ्गुले दृश्येत तदा पुत्रमरणम् । द्व्यङ्गुले पुत्रवृद्धिस्त्र्यङ्गुले पुत्रधननाशश्चतुर्थे पुत्रमङ्गलम् पञ्चाङ्गुले मरणंनरपस्मृनाम् । षड्ङ्गुले कर्म्मसिद्धिः पशुलाभश्च सप्ताङ्गुले कलहेन विनाशं भर्त्तुः करोति । व्रणोऽष्टाङ्गुले मित्रप्राप्तिं धनस्थितिं च कुर्यात् । नवाङ्गुले भ्रातृबधधान्यविनाशम्भर्त्तुः करोति, दशाङ्गुले मित्रभृत्यानां लाभं सम्पद्वृद्धिञ्च, एकादशाङ्गुले संग्रहणं मित्रविरोधञ्च । द्वादशाङ्गुले मित्रलाभम्भोगं सुखं च । त्रयोदशाङ्गुले प्रभुविनाशं चतुर्द्दशाङ्गुले प्रियतां गौरवम्भनलाभं च, पञ्चदशाङ्गुले शत्रुविवृद्धिम् । षोड़शाङ्गुले शत्रुविजयं सप्तदशाङ्गुले भयम्, स्त्रीलाभम् अष्टादशाङ्गुले, शत्रुवधम् ऊनविंशे, वृद्धिं विंशाङ्गुले, मरणम् एकविंशत्यङ्गुले, शत्रुजनितं नाशम्भयं च । द्वाविंशत्यङ्गुले राष्ट्रपालनं परराष्ट्रविनाशं च त्रयोविंशत्यङ्गुले विंशतिवर्षादेव मरणम् । चतुर्विंशत्यङ्गुले भूषणागमम् । पञ्चविंशत्यङ्गुले, भार्य्याविरामम्, षड्विंशत्यङ्गुले प्रियगुणलाभं, स्वभार्य्याविरागन्तु सप्तविंशत्यङ्गुले, विपुलश्रियोलाभमष्टाविंशत्यङ्गुले, एकोनत्रिंशत्यङ्गुले दृढभावे भ्रातृभिर्ग्रहणं, त्रिंशदङ्गुले वृद्धिमजिरंचेति खड्गे व्रणः करोति । तथा एकत्रिंशदङ्गुले सभृत्यस्त्रीवाहनं भर्त्तारं विनाशयति । द्वात्रिंशदङ्गुले पराजयमरिभिः करोति । त्रयस्त्रिंशदङ्गुले भर्त्तारं पीड़यति नीचस्य च कर्म्मणो वशगङ्करोति ।